# कार्यपत्रकम् संस्कृतम् कक्षा अष्टमी प्रथमः पाठः सुवचनानि

## 1 अधोलिखितान् पद्यांशान् पठित्वा मंजूषातः पदानि विचित्य अन्वयं पूरयित्वा लिखत

**श्लोक संख्या 1**

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।**

**अन्वयः –** सर्वे ..1.......................... भवन्तु, सर्वे निरामयाः .......2............................ ।

सर्वे ........3...................पश्यन्तु, कश्चिद् दुःखभाग् .....................4................ भवेत्।।

**मंजूषा –**

| |
|---|
| भद्राणि, मा, सन्तु, सुखिनः |

**श्लोक संख्या 2**

**अधमा धनमिच्छन्ति , धनं मानं च मध्यमाः।**

**उत्तमाः मानमिच्छन्ति , मानो हि महतां धनम्।।**

**अन्वयः –** अधमा .....1...............इच्छन्ति , धनं ...2...........च मध्यमाः( इच्छन्ति ),

....3........................ मानम् इच्छन्ति , मानो हि ........... 4........................ धनम् ( भवति )

**मंजूषा –**

| |
|---|
| उत्तमाः , महतां मानं, धनम् |

**श्लोक संख्या 3**

**जाड्यं धियो हरति सिंचति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरोति।**

**चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्संगतिः कथय किं न करोति पुंसाम्।।**

**अन्वयः –** सत्संगतिः ...............1.............. जाड्यं हरति, वाचि सत्यं सिंचति, मानोन्नतिं .....2............. .पापम् अपाकरोति, चेतः ...........3.. दिक्षु कीर्तिं तनोति, कथय सत्संगतिः .............4...........किं न करोति ।।

**मंजूषा –**

| |
|---|
| पुंसाम्, प्रसादयति, दिशति, धियः, |

**श्लोक संख्या 4**

**निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**

**अद्यैव वा मरणमस्तु युगान्तरे वा न्यायात् पथः प्रविचलन्ति पदं न धीराः।।**

**अन्वयः –** नीतिनिपुणाः यदि ....1.......... स्तुवन्तु वा, लक्ष्मीः ......2..............यथेष्टम् वा गच्छतु, मरणम् अद्यैव अस्तु .....3........... वा, धीराः ..............4...........पथः पदं न प्रविचलन्ति ।।

**मंजूषा –**

| |
|---|
| न्यायात्, युगान्तरे, समाविशतु, निन्दन्तु |

**श्लोक संख्या 5**

**पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान् प्रकटीकरोति।**

**आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।**

**अन्वयः** – (सन्मित्रम्) पापात् निवारयति, ...............1............ योजयते, गुह्यं निगूहति ...............2....................... प्रकटीकरोति, काले(सहयोगं) ददाति, आपद्गतं च न ......3 .......... I. सन्तः इदं ....4.......... प्रवदन्ति ।।

**मंजूषा –**

| |
|---|
| सन्मित्रलक्षणं जहाति गुणान् हिताय |

**2 अधोलिखितान् पद्यांशान् पठित्वा प्रदत्त प्रश्नानाम् उत्तरयणि लिखत।**

**जाड्यं धियो हरति सिंचति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरोति।**

**चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्संगतिः कथय किं न करोति पुसाम्।।**

**(अ) एकपदेन उत्तरत–**

**(क)** सत्संगतिः कस्याः जाड्यं हरति ?

**(ख)** का वाचि सत्यं सिंचति ?

**(ग)** सत्संगतिः किम् अपाकरोति ?

**(घ)** केषां सत्संगतिः कीर्तिं तनोति ?

**(आ) पूर्णवाक्येन उत्तरत–**

**(क)** मानवः कैः सह मित्रता कुर्यात् ?

**(ख)** सत्संगति किं दिशति ?

**(ग)** केषां मित्रतया मनुष्यस्य पापकर्म नष्टं भवति ?

**(घ)** सत्संगतिः केषां सर्वविधां उन्नतिं करोति **?**

**(इ) यथानिर्देशम् उत्तरत–**

**(क) सत्संगतिः कथय किं न करोति पुंसाम्।** अस्मिन् वाक्ये <u>**करोति**</u> इति क्रियापदस्य कर्तृपदं किम् ?

**(ख) मनः** इत्यस्य किं पर्यायवाचिपदं श्लोके प्रयुक्तम् ?

**(ग) अपयशः** इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

**(घ) अनृतम्** अस्मिन् अर्थे श्लोके किं पदं प्रयुक्तम् ?

**निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**

**अद्यैव वा मरणमस्तु युगान्तरे वा न्यायात् पथः प्रविचलन्ति पदं न धीराः।।**

**(अ) एकपदेन उत्तरत–**

(क) के निन्दन्तु स्तुवन्तु वा ?

(ख) का यथेष्टं गच्छतु ?

(ग) अद्यैव युगान्तरे वा किं भवतु ?

(घ) के सत्यमार्गं न त्यजन्ति ?

**(आ) पूर्णवाक्येन उत्तरत–**

(क) लक्ष्मीः यथेष्टं किं करोतु ?

(ख) मरणं कदा भवतु ?

(ग) धीराः किं न कुर्वन्ति ?

(घ) नीतिनिपुणाः किं कुर्वन्तु ?

**(इ) यथानिर्देशम् उत्तरत–**

(क) **प्रविचलन्ति** इति क्रियापदस्य कर्तृपदं किम् ?

(ख) **धनम्** इत्यस्य किं पर्यायवाचिपदं श्लोके प्रयुक्तम् ?

(ग) **स्तुवन्तु** इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(घ) **मरणम्** इति कर्तृपदस्य क्रियापदं किम ?

**पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान् प्रकटीकरोति।**

**आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।**

**(अ) एकपदेन उत्तरत–**

(क) के सन्मित्रस्य लक्षणं वदन्ति ?

(ख) सन्मित्रं कदा न जहाति ?

(ग) सन्मित्रं कस्मात् निवारयति ?

(घ) कः निगूहति ?

**(आ) पूर्णवाक्येन उत्तरत–**

(क) सन्तः किं वदन्ति ?

(ख) सन्मित्रं कदा सहयोगं करोति ?

(ग) आपद्गतं सन्मित्रं किं करोति ?

(घ) सन्मित्रं किं किं करोति ?

**(इ) यथानिर्देशम् उत्तरत–**

(क) निगूहति इति क्रियापदस्य कर्तृपदं किम् ?

(ख) **दुर्गुणान्** इत्यस्य किं पर्यायवाचिपदं श्लोके प्रयुक्तम् ?

(ग) **जहाति** इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(घ) **सन्तः** इति कर्तृपदस्य क्रियापदं किम ?

3 अधोलिखितपदानां सहायतया प्रश्नवाचकवाक्यानि रचयत।

(क) कदा ..................................................................................................................................................

(ख) कुत्र ..................................................................................................................................................

(ग) कथम् ..................................................................................................................................................

(घ) किमर्थम् ..................................................................................................................................................

(च) कुतः ..................................................................................................................................................

(छ) कति ..................................................................................................................................................

4 अधोलिखितवाक्येषु रेखांकितपदेषु उपसर्गान् पृथक् कृत्वा लिखत—

1 निगूहति ............................... + ...............................................

2 प्रवदन्ति ............................... + ...............................................

3 प्रसादयति ............................... + ...............................................

4 निरामयाः ............................... + ...............................................

4 समाविशतु ............................... + ...............................................

5 प्रविचलन्ति ............................ + ...............................................

## कार्यपत्रकम् संस्कृतम् कक्षा अष्टमी द्वितीयः पाठः वसुधैव कुटुम्बकम्

**1 अधोलिखितां कथां मंजूषायाः सहायतया पूरयित्वा पुनः लिखत।**

एकः काकः एका चटका च द्वे ............1.......... आस्ताम्। एकदा तौ एकस्मिन् वृक्षे निर्मितम् एकं सुन्दरं गृहं दृष्ट्वा ....2..................किमर्थं न आवयोः अपि एतादृशं सुन्दरं गृहं भवेत्। काकः वृक्षे मृत्तिकया सुन्दरं गृहं निर्मितवान्। चटका 3..........................स्वगृहं निर्मितवती। भीषणे ग्रीष्मकाले ..4..............................गृहं नष्टम् अभवत्। सा शरणार्थं काकस्य समीपं गत्वा कथयति–भ्रातः! मम गृहं नष्टम् अभवत् अतः कृपया मह्यं स्वगृहे 5...........................................यच्छ। अभिमानी काकः 6....................................शरणं न अयच्छत्।

**मंजूषा**

| चटकायै, शरणं, चटकायाः, तृणैः, अचिन्तयताम्, मित्रे, |
|---|

**2 अधोलिखितां कथां मंजूषायाः सहायतया पूरयित्वा पुनः लिखत।**

वर्षाकाले चटका..1.............................. गृहं अरचयत्। तदैव सहसा अतिवृष्टिः अभवत्। 2 ..........................
गृहम् अपि नष्टम् अभवत्। खिन्नः काकः शरणार्थं चटकायाः समीपं गच्छति। चटका तस्य सहर्षं
3............................करोति कथयति च भ्रातः चिन्तां त्यजतु। अन्तः आगच्छतु। आनन्देन भोजनं करोतु। लज्जितः काकः..........4.................... करोति। सः चिन्तयति अहं तु स्वार्थी अस्मि परन्तु एषा उदारहृदया अस्ति। वर्षाकालात् अनन्तरं काकः पुनः 5 .........................................निर्माणं करोति। चटका अपि सहायतां करोति। उभौ मिलित्वा सुखेन वसतः। सत्यमेव कथितम्....................................... तु वसुधैव कुटुम्बकम्।

**मंजूषा**

| काकस्य, नवीनं, भोजनं, स्वागतं, नवीनगृहस्य, उदारचरितानां |
|---|